# Devaih Kritam 07 Durga Stotram

# देवैः कृतं ७ दुर्गास्तोत्रम् १७

## Document Information

Text title : Devaih Kritam 07 Durga Stotram

File name : devaiHkRRitaM07durgAstotram17.itx

Category : devii, devI, shivapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : shivapurANa | umAsaMhitA | adhyAya 47/3-10||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 19, 2024

*sanskritdocuments.org*

# देवैः कृतं ७ दुर्गास्तोत्रम् १७

देवा ऊचुः ।
जय दुर्गे महेशानि जयात्मीयजनप्रिये ।
त्रैलोक्यत्राणकारिण्यै शिवायै ते नमो नमः ॥ ३॥

नमो मुक्तिप्रदायिन्यै पराम्बायै नमो नमः ।
नमः समस्तसंसारोत्पत्तिस्थित्यन्तकारिके ॥ ४॥

कालिकारूपसम्पन्ने नमस्काराकृते नमः ।
छिन्नमस्तास्वरूपायै श्रीविद्यायै नमोऽस्तु ते ॥ ५॥

भुवनेशि नमस्तुभ्यं नमस्ते भैरवाकृते ।
नमोऽस्तु बगलामुख्यै धूमावत्यै नमो नमः ॥ ६॥

नमस्त्रिपुरसुन्दर्य्यै मातङ्ग्यै ते नमोनमः ।
अजितायै नमस्तुभ्यं विजयायै नमो नमः ॥ ७॥

जयायै मङ्गलायै ते विलासिन्यै नमो नमः ।
दोग्ध्रीरूपे नमस्तुभ्यं नमो घोराकृतेऽस्तु ते ॥ ८॥

मनोऽपराजिताकारे नित्याकारे नमो नमः ।
शरणागतपालिन्यै रुद्राण्यै ते नमो नमः ॥ ९॥

नमो वेदान्तवेद्यायै नमस्ते परमात्मने ।
अनन्तकोटिब्रह्माण्डनायिकायै नमो नमः ॥ १०॥

इति शिवपुराणे उमासंहितायां सप्तचत्वारिंशाध्यायान्तर्गतं
देवैः कृतं दुर्गास्तोत्रं साप्तम् ।

शिवपुराण । उमासंहिता । अध्याय ४७/३-१०॥

shivapurANa . umAsaMhitA . adhyAya 47/3-10..

Proofread by PSA Easwaran

*Devaih Kritam 07 Durga Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*